॥ श्रीः ॥

# ॥ ललिता कवचम् ॥

ललिता पातु शिरो मे ललाटमंबा च मधुमतीरूपा ।
भ्रूयुग्मं च भवानी पुष्पशरा पातु लोचनद्वन्द्वं ॥
पायान्नासां बाला सुभगादन्तांश्च सुन्दरीजिह्वां ।
अधरोष्ठमादिशक्तिश्चक्रेशी पातु मे सदा चुबुकं ॥
कामेश्वरी च कर्णौ कामाक्षी पातु गण्डयोर्युगळं ।
शृङ्गारनायिकाव्याद्वक्त्रं सिम्हासनेश्वरी च गळं ॥
स्कन्दप्रसूश्च पातु स्कन्धौ बाहू च पाटलाङ्गी मे ।
पाणी च पद्मनिलया पायादनिशं नखावळिं विजया ॥
कोदण्डिनी च वक्षः कुक्षिं चाव्यात्कुलाचलतनूजा ।
करुणामयीवलग्नं कटिं च पायात्कलाधरशिखण्डा ॥
ऊरुद्वयं च पायादुमामृडानी च जानुनी रक्षेत् ।
जङ्घे च षोडशी मे पायात्पादौ च पाशसृणिहस्ता ॥
प्रातः पातु परा मां मध्याह्ने पातु मणिगृहाधीशा ।
शर्वाण्यवतु च सायं पायाद्रात्रौ च भैरवी साक्षात् ॥
भार्यां रक्षतु गौरी पायात्पुत्रांश्च बिन्दुगृहपीठा ।
श्रीविद्या च यशो मे शीलं चाव्याच्चिरं महाराज्ञी ॥
पवनमयि पावकमयि क्षोणीमयि गगनमयि कृपीटमयि ।
रविमयि शशिमयि दिङ्मयि समयमयि प्राणमयि शिवे पाहि ॥
काळि कपालिनि शूलिनि भैरवि मातङ्गि पञ्चमि त्रिपुरे ।
वाग्देवि विन्ध्यवासिनि बाले भुवनेशि पालय चिरं मां ॥

इति दुर्वासमुनिविरचितं ललिताकवचं सम्पूर्णम् ॥